CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

Coll. No. ९८

Title Rāmarakṣāstotra

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 784 Subject: Stotra.

Title: Rāmarakṣāstotra.

Author: — Scribe: —

Date of the work: — Date of the Ms.: V.S. 1925

Place of the work: — Place of the Ms.: —

Size: 5.1" by 3.1" Extent: 13 foll.

Language: Sanskrit Script: Devanāgari

Remarks: —

प
ना

॥श्रीरामाय नमः॥ अस्य श्रीरामर
स्तोत्रस्य कौशिक विश्वामित्र ऋ
अनुष्टुप्छंदः॥ राक्षसमर्दन श्रीरा
मचंद्रो देवता॥ सर्वरक्षार्थे श्रीराम
चंद्रप्रीत्यर्थे जपे विनियोगः॥ ॐ जंतरामभो

रामेति मधुरं मधुराक्षरं॥ आरुह्य
कवितांशाखां वंदे वाल्मीकि कोकि
लं॥१॥ दक्षिणे लक्ष्मणो यस्य वामे तु
जनकात्मजा॥ पुरतो मारुतिर्यस्य
तं वंदे रघुनंदनं॥२॥ चरितं रघुना

थस्यशतकोटिप्रविस्तरं ॥ एकैकम
क्षरंपुंसांमहापातकनाशनं ॥ ३ ॥
ध्यात्वानीलोत्पलश्यामंरामंराजीव ॥ २
लोचनं ॥ जानकीलक्ष्मणोपेतंजटा
मुकुटमंडितं ॥ ४ ॥ सासितूणधनु

र्बाणपाणिंनक्तंचरांतकं ॥ स्वलील
याजगत्त्रातुमाविर्भूतमजंविभुं ॥ ५ ॥
रामरक्षांपठेत्प्राज्ञःपापघ्नींसर्वका
मदां ॥ शिरोमेराघवःपातुभालंदशर
थात्मजः ॥ ६ ॥ कौशल्येयोदृशौपातु

विश्वामित्रः प्रियः श्रुती ॥ घ्राणं पातु
मखत्राता मुखं सौमित्रिवत्सलः ॥ ७
जिह्वां विद्यानिधिः पातु कंठं भरत ॥३॥
वंदितः ॥ स्कंधौ दिव्यायुधः पातु भु
जौ भग्नेशकार्मुकः ॥ ८ ॥ करौ सी

तापतिः पातु हृदयं जामदग्न्यजित् ॥ म
ध्यं पातु खरध्वंसी नाभिं जांबुवदाश्रयः ४
सुग्रीवेशः कटिं पातु सक्थिनी हनुम
त्प्रभुः ॥ ऊरू रघूत्तमः पातु रक्षःकुलवि
नाशकृत् ॥ १० ॥ जानुनी सेतुकृत्पा

तुजंघेदशमुखांतकः ॥ पादौ विभीषणः
श्रीदः पातुरामोखिलंवपुः ॥११॥ एतां
रामबलोपेतांरक्षांयः सुकृतीपठेत् ॥ ॥४॥
सचिरायुः सुखीपुत्रीविजयीविनयी
भवेत् ॥१२॥ पातालभूतलव्योमचारि

णःछद्मचारिणः ॥ नद्रष्टुमपिशक्ता
स्तेरक्षितंरामनामभिः ॥१३॥ रामेति
रामभद्रेतिरामचंद्रेतिवास्मरन् ॥ न
रोनलिप्यतेपापैर्भुक्तिंमुक्तिंचविंद
ति ॥ १४ ॥ रामायरामभद्रायरामचंद्रा

यवेधसे रघुनाथायनाथाय सीतायाःप
तयेनमः ॥१५॥ जगज्जैत्रेकमंत्रेणरामना
म्नाभिरक्षितं । लिखित्वाधारयेद्यस्तुक ॥५
रस्थाः सर्वसिद्धयः ॥१६॥ वज्रपंजरना
मेदंयोरामकवचंपठेत् । अव्याहता

ज्ञः सर्वत्रलभतेजयमंगलं ॥१७॥ आ
दिष्टवान्यथास्वप्नेरामरक्षामिमंहरे ।
तथालिखितवान्प्रातः प्रबुद्धः कौ
शिकोमुनिः ॥१८॥ अक्षीणचापतूणी
रसमरोचितकार्मुकः । करेविधृते

कशारश्रीरामः शरणंमम ॥१९॥ नृसिं
होमेयतः पातु पृष्ठतः पातु माधवः पा
र्श्वयोश्चधनुष्पाणी शशारौरामलक्ष्मणौ
॥२०॥ तरुणौरूपसंपन्नौ सुकुमारौमहा
बलौ। पुंडरीकविशालाक्षौचीरकृष्णा ६

जिनांबरौ ॥२१॥ फलमूलाशिनौदांतौ ताप
सौब्रह्मचारिणौ ॥ पुत्रौदशरथस्यैतौभ्रा
तरौरामलक्ष्मणौ ॥२२॥ शरण्यौसर्व
सत्वानां श्रेष्ठौसर्वधनुष्मतां ॥ रक्षः
कुलनिहंतारौत्रायेतान्नोरघूत्तमौ

२३ ॥ सन्नद्धः कवचीखड्गी चापबाणधरोयु
वा ॥ गछन्मनोरथोस्माकं रामः पातुसल
क्ष्मणः ॥ २४ ॥ आत्तसज्जधनुषाविषु ॥ ७ ॥
स्पृशावक्षयाशुगनिषंगसंगिनौ ॥ र
क्षणायममरामलक्ष्मणावग्रतःपथि

सदैव गछतां ॥ २५ ॥ चेतोभिरामंनय
नाभिरामं वाचाभिरामंवदनाभिरा
मं ॥ श्रोत्राभिरामंसदनाभिरामंवंदे
सदादाशरथिंचरामं ॥ २६ ॥ लोका
भिरामं रणरंगधीरं राजीवनेत्रंरघु

वंशवीरं ॥ कारुण्यरूपं करुणाकरं तं
श्रीरामचंद्रं शरणं प्रपद्ये ॥ २७ ॥ श्रीरा
मरामरघुनंदनरामराम राजीवलो
चनमनोहर रामचंद्र ॥ सौमित्रिपू ॥ ८ ॥
र्वजसमस्तजनाभिरामं ॥ दासोहं

मद्य भवतः शरणागतोस्मि ॥ २८ ॥
धन्विनौबद्धनिस्त्रिंशौकाकपक्ष
धरावुभौ ॥ वीरौमांपथि रक्षेतांभ्रा
तरौ रामलक्ष्मणौ ॥ २९ ॥ आराम
:कल्पवृक्षाणां विरामः सकला

परं ॥ अभिरामस्त्रिलोकानां रामः श्रीजग
त्प्रभुः ॥ २० ॥ रामो दाशरथिः शूरो ल
क्ष्मणानुचरो बली ॥ काकुत्स्थः पुरु ॥ ८ ॥
षः पूर्णः कौशल्येयो रघूत्तमः ॥ २१ ॥
वेदांतवेद्यो यज्ञेशः पुराणपुरुषोत्त

मः ॥ जानकीवल्लभः श्रीमानप्रमे
यपराक्रमः ॥ २२ ॥ इत्येतानि
जपेन्नित्यं यो नरः श्रद्धयान्वितः
अश्वमेधाधिकं पुण्यं संप्राप्नोति
न संशयः ॥ २३ ॥ आपदामपहं

तारंदातारंसर्वसंपदां ।लोकाभिरामं
श्रीरामंभूयोभूयोनमाम्यहं ॥३४॥
जयत्यतिबलोरामोलक्ष्मणश्चम ॥२०॥
हाबलः ॥राजाजयतिसुग्रीवोराघ
वेणानुपालितः ॥३५॥ श्रीरामरा

मरणकर्कशारामराम ॥श्रीराम
रामभरताग्रजरामराम ॥श्रीराम
रामरघुनंदनरामराम श्रीरामरा
मशरणंभवरामराम ॥३६॥ ॥
रामलक्ष्मणपूर्वजंरघुपतिंसीता

पतिंसुंदरं काकुस्थकरुणाकरंगुण
निधिंविप्रप्रियंधार्मिकं ॥ राजेंद्रंस
त्यसिंधुंदशरथतनयंश्यामलंशां ॥११॥
तिमूर्त्तिं वंदेलोकाभिरामंरघुपति
तिलकंराघवंरावणारिं ॥ ३७ ॥ धन्या

योध्यादशरथनृपःसाचमाताचध
न्या ॥ धन्योवंशोरघुकुलनवोयत्र
रामावतारः ॥ धन्यावाणीकविव
रमुखेरामनामप्रपन्ना ॥ धन्योलो
कःप्रतिदिनमसौरामवृत्तंशृणो

ति ॥ ३८ ॥ मातारामोमत्पिताराम
चंद्रः स्वामीरामोमत्सखारामचंद्रः
सर्वस्वंमेरामचंद्रोदयालो ॥ नान्यं ॥ १२
जानेनैवजानेनजाने ॥ ३९ ॥ श्री
रामरामामृतमंत्रबीजं संजीवनं

चेन्मनसिप्रविष्टं ॥ हलाहलंवाप्रल
यानलंवा ॥ मृत्योर्मुखंवारमतांकुतो
मे ॥ ४० ॥ श्रीरामतवनामानियः प
ठेतिदिनेदिने ॥ मुच्यतेसर्वपापे
भ्यो विष्णुलोकंसगच्छति ॥ ४१ ॥

इतिश्रीरामरक्षास्तोत्रसंपूर्णता
॥ संवत् १८२८ वर्षे शाके १६
९३ प्रवर्त्तमाने ॥ कार्त्तिकमा ॥२३॥
से कृष्णपक्षे नवमी तिथौ सू
र्यपुत्रवारे लिखिता । श्रीम्